RAJAPRASHASTI

A

POEM

BY

Professor TARANATHA TARKAVACHASPATI

Printed At the Saraswati Press,

1988.

RAJAPRASHASTI

A

POEM

BY

PROFESSOR TARANATHA TARKAVACHASPATI

EDITED

WITH A COMMENTARY

BY

PANDIT JIBANANDA VIDYASAGARA, B. A.

Superintendent Free Sanskrit College.

FOURTH EDITION.

CALCUTTA.

PRINTED AT THE SARASWATI PRESS.

1888.

To be had from Pandit Jibananda Vidyasagara, B. A.
Superintendent Free Sanskrit College,
No, 2 Ramanatha Majumdara's Street, Calcutta.

एतानि मुद्रितसंस्कृतपुस्तकानि ।

पुस्तक	मूल्य
१ आशुबोधव्याकरणम्	२
२ धातुरूपादर्शः	१॥
३ शब्दस्तोमसहार्णनिधिः	८
४ सिद्धान्तकौमुदी सरलासहिता	१०
५ सिद्धान्तविन्दुसारः (वेदान्त)	॥
६ तुलादानादिपद्धतिः (वङ्गाक्षरैः	४
७ गयाश्राद्धादिपद्धतिः	१
८ शब्दार्थरत्नम्	॥।
९ वाक्यमञ्जरी (वङ्गाक्षरैः)	।०
१० छन्दोमञ्जरी तथा वृत्तरत्नाकर सटीक	॥०
११ वेणीसंहार नाटक सटीक	॥।०
१२ मुद्राराक्षस नाटक सटीक	॥।
१३ रत्नावली नाटिका सटीक	॥
१४ मालविकाग्निमित्र सटीक	१
१५ धनञ्जय विजय सटीक	।०
१६ महावीरचरितनाटक	॥०
१७ साङ्ख्यतत्त्वकौमुदी सटीक	२
१८ वैयाकरणभूषणसार	॥।
१९ लीलावती	॥०
२० वीजगणित	॥।
२१ शिशुपालवध सटीक (माघ)	२
२२ किरातार्जुनीयं सटीक	१॥०
२३ कुमारसम्भव पूर्वखण्ड सटीक	॥०
२४ कुमारसम्भव उत्तरखण्ड सटीक	॥०
२५ अष्टकम् पाणिनीयम्	॥०
२६ वाचस्पत्यम् (वृहदभिधान)	१००
२७ कादम्बरी सटीक	१॥०
२८ राजप्रशस्ति सटीक	।/
२९ अनुमानचिन्तामणि तथा अनुमानदीधिति	४
३० सर्वदर्शनसंग्रहः	१
३१ भामिनीविलास सटीक	॥
३२ हितोपदेश सटीक	॥।
३३ भाषापरिच्छेदमुक्तावलीसहित	॥
३४ बहुविवाहवाद	।०
३५ दशकुमारचरित सटीक	१
३६ परिभाषेन्दुशेखर	॥०
३७ कविकल्पद्रुम धातुपाठः	।०
३८ चक्रदत्त (वैद्यक)	१॥०
३९ जगादिसूत्र सटीक	२
४० मेदिनीकोष	१
४१ पञ्चतन्त्रम् सटीक	१
४२ विद्वन्मोदतरङ्गिणी (चम्पूकाव्य)	॥
४३ माधवचम्पू	।०
४४ तर्कसंग्रह इं अनुवाद सहित	॥
४५ प्रसन्नराघव नाटक	१
४६ विवेकचूडामणि	।/
४७ काव्यसंग्रह सटीक (संपूर्ण)	७
४८ लिङ्गानुशासन सटीक	।
४९ ऋतुसंहार सटीक	।/
५० विक्रमोर्वशी (सटीक)	१
५१ वसन्ततिलक भाण	।/
५२ गायत्री व्याख्या	॥०
५३ सांख्यदर्शन (भाष्यसहित)	२
५४ भोजप्रबन्ध	॥
५५ नलोदय सटीक	।/
५६ ईश केन कठ प्रश्न मुण्ड माण्डूक्य (सटीक सभाष्य)	५
५७ छान्दोग्य सटीक सभाष्य	५
५८ तैत्तिरीय ऐतरेय श्वेताश्वतर (उपनिषद्) सभाष्य सटीक	२

राजप्रशस्तिः ।

स्वस्ति श्रीमन्महाराजाधिराजेषु निवेदनम् ।
तारानाथद्विजस्येदमाशीराशिपुरःसरम् ॥१॥
कमला कमलालयालये लसतात्तेऽचपला निरन्तरम् ।
वदने वचनाधिपालिका समरे तेऽग्रसरास्तु कालिका ॥२॥
चित्तसद्मनि तवास्तु सन्ततं वासुदेवपदवाच्यधाम तत् ।
येन सर्वमिदमाततं ततं पालितं तदनु संहृतं क्रमात् ॥३॥
योगमार्गनिहितेन चेतसा विश्वरूपमनघं विभावय ।
तेन लब्धपुरुषार्थसार्थकं सार्थकं जननमस्तु भूप ! ते ॥४॥

स्वस्तीति । स्वस्ति शुभसूचकं श्रीमत्सु महाराजाधिराजेषु तारानाथद्विजस्य इदम् आशिषां राशिः समूहः पुरःसरो यत्र तादृशं निवेदनं वचनम् । अनुष्टुब्वृत्तम् ॥१॥

कमलेति । कमलालया पङ्कजवासिनी कमला लक्ष्मीः ते तव आलये गृहे निरन्तरम् अचपला अचञ्चला स्थिरेत्यर्थः सती लसतात् विराजतु, तथा वचनाधिपालिका वाग्देवी ते वदने निरन्तरं लसता-दिति पूर्वेणान्वयः । कालिका च ते तव समरे संग्रामे अग्रसरा अग्रवर्त्तिनी अस्तु भवतु ॥२॥

चित्तेति । येन इदम् आततं विस्तृतं सर्वं जगत् ततं सृष्टं तदनु तदनन्तरं पालितं ततः क्रमात् संहृतं तत् वासुदेवपदस्य वाच्यम् अभिधेयं धाम तेजः ब्रह्मेति यावत् तव चित्तसद्मनि मनो-गृहे सन्ततम् अविरतम् अस्तु तिष्ठतु । रथोद्धतावृत्तम् ॥३॥

योगेति । त्वं योगमार्गे समाधिनियमे निहितेन निविष्टेन चेतसा मनसा विश्वरूपम् अनघं ब्रह्मेति यावत् विभावय चिन्तय ।

सबीजा हृद्वृत्तिः क्रममनुगता बीजरहिता
परे तत्त्वे सम्यग् लयमुपगता जन्मशमनी ।
त्रयाणां तापानामतिशयसमूलक्षयकरी
प्रगाढं ते भूयात् प्रकृतिपुरुषव्यक्तिजननी ॥५॥

सम्प्रज्ञातसमाधिधूतनिरये चित्ते क्रमादुन्नताऽ-
सम्प्रज्ञातसमाधिना नरपते ! भूयात् विवेकोदयः ।
अत्यन्तः पुरुषार्थलाभ इह ते भूयाच्च भूमीपते !
येनाश्रान्तभवेन तेन न भवे भूयात् पुनः सम्भवः ॥६॥

हे भूप ! तेन ब्रह्मचिन्तनेन ते तव सर्वः अधिगतः पुरुषार्थानां धर्मार्थकाममोक्षलक्षणानां सार्थः समूहः यस्मिन् तथाभूतम् अतएव सार्थकं सफलं जननम् अस्तु भवतु । रथोद्धतावृत्तम् । रात् परैर्नरलगैरथोद्धतेति तल्लक्षणात् ॥४॥

सबीजेति । सबीजा बीजेन तत्त्वावधानेन सहिता तत्त्वानुसन्धायिनीति यावत् क्रमं सातत्यम् अनुगता सततप्रवाहितेति यावत् बीजरहिता कारणरहिता स्वाभाविकीति यावत् परे तत्त्वे परमात्मनि सम्यक् लयं समासक्तिम् उपगता प्राप्ता जन्मशमनी पुनर्जन्मनिवारिणीत्यर्थः त्रयाणाम् आध्यात्मिकाधिदैविकाधिभौतिकानां तापानाम् अतिशयेन समूलक्षयं करोतीति तथोक्ता प्रकृतिपुरुषयोः व्यक्तिर्विभेदः तस्याः जननी बोधनी ते तव हृद्वृत्तिः मनोवृत्तिः प्रगाढम् अत्यर्थं भूयात् । शिखरिणीवृत्तं, रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणीति तल्लक्षणात् ॥५॥

संप्रज्ञातमिति । हे नरपते ! सम्यक् प्रकर्षेण ज्ञातेन अनुष्ठितेनेति यावत् समाधिना योगेन धूतः निरस्तः निरयः दुष्कृतं यस्मात् तथाभूते चित्ते सतीति शेषः क्रमात् पर्यायक्रमेण असंप्रज्ञाते दुरधिगमे ब्रह्मणीति भावः समाधिना मनोनिवेशेन विवेकस्य

चित्तप्रसादनकरी परिकर्मरूपा
ज्योतिष्मती मधुमती च तथा विशोका ।
आनन्दया च सहिता सततं चकास्तु
भूपालवर्य्य ! सततं तव चित्तवृत्तिः ॥७॥

मैत्री साधुषु दुःखितेषु करुणोपेक्षा च पापात्मसु
वृत्तिः सा हृदयस्य भूप ! मुदिता सौख्यान्वितेष्वस्तु ते ।
एतासां परिशुद्धभाववशतः स्थैर्य्यान्वितं मानसं
सर्वानर्थनिवर्हणाय नृप ! ते शान्तिं परामृच्छतु ॥८॥

प्रशमस्य उदयः भूयात् । हे भूमिपते ! इह अस्मिन् लोके ते तव [illegible] महान् पुरुषार्थानां धर्मादीनां लाभः भूयात् येन अस्मान्नयेन अनवरतजातेन तेन पुरुषार्थलाभेन ते तव भवे संसारे पुनः सम्भवः पुनर्जन्म न भूयात् न भवतु । शार्दूलविक्रीडितं वृत्तम् । सूर्य्याश्वैर्यदि मः सजौ सततगाः शार्दूलविक्रीडितमिति तल्लक्षणात् ॥६॥

चित्तेति । हे भूपालवर्य्य ! राजाधिराज ! तव चित्तवृत्तिः अन्तर्वृत्तिः सततं चित्तप्रसादनकरी लोकानां मनोरञ्जनी परिकर्मरूपा प्रसाधनस्वरूपिणी ज्योतिष्मती तेजस्विनी मधुमती माधुर्य्यगुणोपेता तथा विशोका शोकरहिता सततम् आनन्दया सन्तोषेण सहिता च सती चकास्तु विराजतु । वसन्ततिलकं वृत्तं, ज्ञेयं वसन्ततिलकं तभजा जगौ ग इति तल्लक्षणात् ॥७॥

मैत्रीति । हे भूप ! ते तव सा प्रसिद्धा साधुषु मैत्री, दुःखितेषु करुणा, पापात्मसु असाधुषु उपेक्षा, सौख्यान्वितेषु सुखिषु मुदिता हर्षवती हृदयस्य वृत्तिः अस्तु भवतु । हे नृप ! एतासां मैत्रीप्रभृतीनां परिशुद्धभाववशतः विशुद्धाभिप्रायत्वेन स्थैर्य्यान्वितं सुस्थिरम् अचलमित्यर्थः ते तव मानसं सर्वेषाम् अनर्थानां पापानां निर्ह-

योगोक्तलक्षणयमादिभिरष्टसंख्यै-
र्योगानुशीलनमनुक्षणमातनु त्वम् ।
तुष्टीः सदा नवविधा नृपते ! लभस्व
लभ्यन्तु योगजनितास्तव सिद्धयोऽष्टौ ॥९॥

क्लेशजन्मपरिहीण ईश्वरो
वासनारहित एष भूपते ! ।
कर्मपाकपरिमुक्त आदिम-
श्चेतसि प्रणिहितः सदास्तु ते ॥१०॥

साङ्ख्यं विषयेषु सन्ततमनुस्यूतं विहायान्तरं
योगं वृत्तिनिरोधलक्षणमथो चित्तस्य भूपाश्रुहि ।

आव निवारणाय परां शान्तिं सन्तोषम् इच्छतु प्राप्नोतु । शार्दूलविक्रीडितं वृत्तम् ॥८॥

योगेति । हे नृपते ! त्वम् अष्टसंख्यैः अष्टविधैः योगः जीवब्रह्मणोरैक्यचिन्तनं तस्मिन् उक्तं लक्षणं येषां तथोक्ताः ये यमादयः यमः बाह्येन्द्रियसंयमः आदिर्येषां तथोक्ताः तैः अनुक्षणं सततं योगानुशीलनम् आतनु कुरु । हे नृपते ! त्वं सदा नवविधाः शास्त्रनिरूपिता इति भावः तुष्टीः सन्तोषान् लभस्व, तथा तव योगजनिताः योगाभ्याससाधिताः अष्ट सिद्धयः, अणिमा लघिमा व्याप्तिः प्राकाम्यं महिमा तथा । ईशित्वञ्च वशित्वञ्च तथा कामावसायितेत्युक्तलक्षणाः लभ्यन्तु स्फुरन्तु । वसन्ततिलकं वृत्तम् ॥९॥

क्लेशेति । हे भूपते ! क्लेशेन जन्मना च परिहीणः अक्लेशः अजन्मेत्यर्थः वासनारहितः संस्काररहितः कर्मणां पाकेन परिमुक्तः विरहितः आदिमः एषः ईश्वरः ते तव चेतसि सदा प्रणिहितः सन्निविष्टः अस्तु । रथोद्धतावृत्तम् ॥१०॥

साङ्ख्यमिति । हे भूप ! त्वं विषयेषु स्रक्चन्दनवनितादिषु

येन स्यात् परनिर्वृतिर्न च पुनर्जन्मादिकं भूपते !
जायेतापि भवार्णवे न च गतिः संसारमूलक्षयात् ॥११॥

शान्तो दान्तेन्द्रियः सन्नुपरतिसहितो दुःखसौख्ये सहिष्णु-
र्विश्वासी शास्त्रवाक्ये गुरुवचसि तथा, श्रद्धया संयुतश्च ।
आत्मन्येवात्मवीक्षानियतनिरतिमत् सर्वयोगाङ्गयुक्तो
भूया भूपाल ! भूयो भवभवनसमुच्छेदबोधोदयाय ॥१२॥

आपाततो ज्ञातवेदवेदाङ्गार्थोऽपकल्मषः ।
नित्यनैमित्तिकप्रायश्चित्तोपास्तिपरोऽसि यत् ॥१३॥

बाह्यवस्तुषु सन्ततम् अनुस्यूतम् अनुविद्धं संलग्नमिति यावत् आन्तरं साक्ष्यम् अन्तःकरणवृत्तिमिति यावत् विहाय त्यक्त्वा अथ तत्त्यागानन्तरमित्यर्थः वृत्तिनिरोधलक्षणं योगम् उपायम् आमुहि लभस्व। येन परा निर्वृतिः परमसन्तोषः स्यात्, तथा संसारस्य मूलक्षयात् पुनर्जन्मादिकं न च, भवार्णवेऽपि गतिः न च जायेत। शार्दूल-विक्रीड़ितं वृत्तम् ॥११॥

शान्त इति। हे भूपाल ! त्वं भूयः पुनः भवभवनस्य संसार-जन्मनः समुच्छेदे यो बोधः तस्य उदयार्थं शान्तः दान्तेन्द्रियः जितेन्द्रियः सन् उपरतिसहितः विरतिसहितः दुःखसौख्ये सहिष्णुः सुखदुःखसहनशीलः शास्त्रवाक्ये विश्वासी तथा गुरूणां वचसि श्रद्धया संयुतः आत्मन्येव स्वस्वरूपे एव या आत्मनः परमात्मनः वीक्षा साक्षात्कारः तया नियतं निरतिमत् सन्तोषवान् सर्वैः योगाङ्गैः यमनियमादिभिरष्टभिः युक्तः भूयाः भव। स्रग्धरा वृत्तम्, म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्त्तितेयमिति तल्लक्षणात् ॥१२॥

आपातत इति। यत् यतः त्वम् आपाततः आक्षरं ज्ञातः विदितः वेदानां सामादीनां वेदाङ्गानां शिक्षादीनाञ्च अर्थः तात्पर्यं येन तथाभूतः तथा नित्यानि अवश्यकर्त्तव्यानि नैमित्ति-

नित्यानित्यविवेकिता तव सदा मोक्षे च तीव्रस्पृहा
वैराग्यं विषये तवास्ति सततं शान्त्यादि षट्कं तथा ।
तेन ब्रह्मविचारणे नरपते ! मन्येऽधिकारी भवान्
तस्मात् सद्गुरुसेवनेन सततं तत्रैव यत्नं क्रियाः ॥१४॥

युग्मम् ।

वेदार्थानुभवेन यज्ञविधिना दानैस्तपश्चर्यया
प्रायश्चित्तविधानतो विविदिषा जातेति मन्ये तव ।
यस्या ब्रह्मविचारणाय यतसे वित्तादिमुक्तैषणः
भूयात् ते नृप ! वेदवाक्यजनिता ब्रह्मात्मसाक्षात्कृतिः ॥१५॥

कानि निमित्तवशात् उपस्थितानि यानि प्रायश्चित्तानि पापशमन-कर्माणि तेषाम् उपासितुः उपासनात् अनुष्ठानादित्यर्थः परः तत्-परः, अतः अपगतपापः निष्पापः असि । अनुष्टुब्वृत्तम् ॥१३॥

नित्येति । हे नरपते ! तव नित्यानित्यविवेकिता नित्यस्य परमात्मनः अनित्यस्य जगतः विवेकिता विविक्तज्ञानं सदा सततं मोक्षे तीव्रा उत्कटा स्पृहा इच्छा च अस्तीति शेषः, तथा तव सततं विषये बाह्यवस्तुनि भोग्यवस्तुनीत्यर्थः वैराग्यं वीतस्पृहत्वं तथा शान्त्यादिषट्कं योगशास्त्रोक्तलक्षणम् अस्तीति शेषः । तेन हेतुना भवान् ब्रह्मविचारणे तत्त्वानुशीलने अधिकारी इति मन्ये, तस्मात् सतां गुरूणां सेवनेन परिचर्यया सततं तत्रैव ब्रह्मविचारणे एव यत्नं क्रियाः कुरु । शार्दूलविक्रीडितं वृत्तम् ॥१४॥

वेदार्थानुभवेनेति । हे नृप ! तव वेदार्थस्य अनुभवेन बोधेन यज्ञविधिना यज्ञानुष्ठानेन दानैः तपसः चान्द्रायणादीनां चर्यया अनुष्ठानेन प्रायश्चित्तानां पापशमनकर्मणां विधानतः विधानेन विविदिषा ज्ञानेच्छा जाता इति मन्ये, यस्याः विविदिषायाः हेतोः वित्तादिषु धनादिषु मुक्ता त्यक्ता एषणा स्पृहा येन तथाभूतः सन्

यया शक्त्या सम्यक् प्रसृतमपि चैतन्यममलं
गुहास्थं सद्रत्नं तिमिरनिकरेणावृतमिव ।
जहि त्वं विक्षेपाह्वयपरमशक्त्या पुनरमुं
ततस्ते चैतन्यं हृदयसदने संस्फुरतु तत् ॥१६॥
दोषानशेषानपहाय सम्यग्बोधेन जीवन्नपि मुक्त एव ।
प्रारब्धकर्मक्षयतः परस्ताद्विदेहकैवल्यमवाप्नुहि त्वम् ॥१७॥
याथार्थ्यबोधेन निवृत्तमिथ्याज्ञानस्य दोषादिविवर्जितस्य ।

ब्रह्मविचाराख्याय तत्त्वानुशीलनाय यतसे यत्नवान् असि, अतः ते तव वेदवाक्येन वेदार्थानुशीलनेन जनिता ब्रह्मात्मसाक्षात्कृतिः ब्रह्मणः परमात्मनः आत्मनि साक्षात्कारः भूयात् । शार्दूलविक्रीडितं वृत्तम् ॥१५॥

यथेति । यया शक्त्या अविद्ययेति यावत् सम्यक् प्रसृतं स्फुरितमपि अमलं गुहास्थं हृदयस्थं चैतन्यम् आत्मतत्त्वं तिमिरेण अन्धकारेण आवृतं सद्रत्नमिव आवृतं लोकैरज्ञातमिति भावः पुनः किन्तु त्वं विक्षेपाह्वया विक्षेपनाम्नी आवरणभेदिनीति यावत् या परमा शक्तिः तत्त्वज्ञानमिति यावत् तया अमूं शक्तिम् अविद्यामित्यर्थः जहि नाशय, ततः अविद्याध्वंसनानन्तरं तत् चैतन्यं ते तव हृदयसदने मनोमन्दिरे संस्फुरतु सन्दीप्यताम् । शिखरिणीवृत्तम् ॥१६॥

दोषानिति । अशेषान् समस्तान् दोषान् अपहाय त्यक्त्वा सम्यग्बोधेन सम्यग्ज्ञानेन जीवन्नपि जनः मुक्त एव मुक्तिं गत एव । त्वं प्रारब्धस्य पूर्वकृतस्य कर्मणः शुभाशुभरूपस्य क्षयतः क्षयात् परस्तात् अनन्तरं विदेहकैवल्यं भौतिकदेहवर्जितं मोक्षम् अवाप्नुहि लभस्व । उपजातिवृत्तम् ॥१७॥

याथार्थ्येति । याथार्थ्यबोधेन तत्त्वज्ञानेन निवृत्तं मिथ्या-

अजन्मनस्ते क्रमशोऽप्रवृत्तेरात्यन्तिकी दुःखनिवृत्तिरास्ताम् ॥१८
शान्ते स्वान्ते निशान्ते तव वसतुतरां सर्वलोकैकसाक्षी
भूयोभूयोऽभिभूया रिपुकुलनिवहं सर्वधामैकधामन् ! ।
प्रत्यूहव्यूहराशिस्तव विलयमितो युद्धयात्रासु भूयाद्
भूपे भूपेऽनुरूपे भवतु च नितरां तेऽनुकम्पा सदैव ॥१९॥

सर्वप्रत्ययसङ्गता निगदिता सत्साधनैरन्विता
लिङ्गालिङ्गयुता विभक्तिवचनैर्नित्यं समुद्भासिनी ।
स्फोटात्मा प्रकृतिस्त्वदीयहृदये नित्यं जरीजृम्भतां
नित्या ब्रह्ममयी विवर्त्तजगतामर्थात्मनामाश्रयः ॥२०॥

ज्ञानम् अविद्येति यावत् यस्य तथाभूतस्य दोषादिविवर्जितस्य अप्रवृत्तेः वीतरागस्य अतएव क्रमशः अजन्मनः पुनर्जन्मरहितस्य ते तव आत्यन्तिकी दुःखनिवृत्तिः आस्तां भवतु । उपजातिवृत्तम् ॥१८॥

शान्ते इति । सर्वलोकानाम् एकः अद्वितीयः साक्षी परमात्मा तव शान्ते स्वान्ते मनसि निशान्ते गृहे, निशान्तं गृहशान्तयो-रित्यमरः । वसतुतरां सततं वसत्वित्यर्थः । हे सर्वधामैकधामन् ! सर्वतेजसाम् एकनिलय ! भूयोभूयः पुनः पुनः रिपुकुलनिवहं शत्रुकुलसङ्घम् अभिभूयाः पराजयस्व । तव युद्धयात्रासु प्रत्यूहव्यूहानां विघ्नसमूहानां राशिः विलयमितः नाशं गतः भूयात् । अनुरूपे तवाज्ञानुसारिणीति भावः भूपे भूपे राजनि राजनि ते तव सदा एव अनुकम्पा नितराम् अत्यर्थं भवतु च, स्रग्धरावृत्तम् ॥१९॥

सर्वेति । सर्वेषां प्रत्ययेन ज्ञानेन विश्वासेनेत्यर्थः सर्वैः प्रत्ययैः प्रकृतेः परस्तात् प्रयुज्यमानैः तव्यादिभिश्च सङ्गता संयुता सद्भिः साधनैः कारकैः षड्दादिभिः सूत्रानुबोधितनिष्पादनप्रकारैश्च अन्विता युक्ता लिङ्गेन हेतुना अलिङ्गेन स्वभावेन च पक्षे लिङ्गेन पुंस्त्वादिना अलिङ्गेन अव्ययत्वनिबन्धनेनेति यावत् युता विभक्तिवचनैः विभाग-

प्रजाः प्रजापाल ! पितेव पाया घोरादपायाज्जगदेकमान्य ! ।
समस्तविज्ञानविवर्द्धनार्थं लोकानशेषानिह शिक्षय त्वम् ॥२१॥
धर्मेषु चित्तं रमतां निरन्तरं कुकर्मवृत्तेश्च निवर्त्ततां तव ।
प्रजासु कल्याणकरी हृदन्तरे वृत्तिस्त्वदीया सततं विराजताम्॥२२

माधुर्य्यादिगुणैर्जुषां सुवचसां रीत्यादिसंशोभिनां
सर्वालङ्कृतिशालिनां कलयसे सम्यक् रसास्वादनम् ।

व्यञ्जकशाक्यैः विभक्तिभिः सुप्तिङ्लक्षणाभिः वचनैरेकत्वादिभिश्च नित्यं सततं समुद्भासिनी सम्यक् विद्योतिनी स्फुटति प्रकाशते अर्थः येन स स्फोटः पूर्वापूर्ववर्णानुभवसहितचरमवर्णव्यङ्ग्यार्थवान् शब्दः आत्मा यस्याः तथोक्ता नित्या ब्रह्ममयी विवर्त्तजगतां अमत्-प्रपञ्चस्य अर्थात्मनाम् अर्थस्वरूपाणाम् आश्रयः निगदिता जगत्-कारणत्वेन कथिता प्रकृतिः सत्त्वरजस्तमोगुणमयी ऐशी शक्तिः त्वदीयहृदये नित्यं सततं जरीजृम्भतां पुनः पुनरतिशयेन प्रकाशताम् । शार्दूलविक्रीडितं वृत्तम् ॥२०॥

प्रजा इति । हे प्रजापाल ! जगताम् एकमान्य ! त्वं पितेव घोरात् अपायात् आपदः प्रजाः पायाः रक्ष, इह जगति समस्त-विज्ञानविवर्द्धनार्थम् अशेषान् सर्वान् लोकान् शिक्षय । उपजाति-वृत्तम् ॥२१॥

धर्मेष्विति । तव चित्तं निरन्तरं धर्मेषु रमतां रतं भवतु, कु-कर्मणां वृत्तेराचरणाच्च निवर्त्ततां निवृत्तं भवतु, त्वदीया प्रजासु कल्याणकरी शुभकरी वृत्तिः हृदन्तरे मनोमध्ये सततं विराजताम् । वंशस्थविलं वृत्तं, वदन्ति वंशस्थविलं जतौ जराविति तल्लक्षणात् ॥२२॥

माधुर्य्यादीति । त्वं माधुर्य्यादिभिः माधुर्यं चित्तस्य द्रव-हेतुभूतः आह्लादः । तदुक्तं दर्पणे । चित्तद्रवीभावमयो ह्लादो माधुर्यमुच्यते इति ॥ आदिपदेन ओजःप्रसादादीनां ग्रहणम् । गुणैः

सत्काव्यार्थविभावनैकनिपुणः प्राज्ञोऽसि तेनाप्यहं
कीर्त्तिस्यूतगुणादिवर्णनविधौ जातस्तवोत्कण्ठितः ॥२३॥
यावद्यस्य मतिर्विधावति परं तावद्धि तेनोद्यते
निःसीमे भवतो गुणार्णव इह प्रान्तं कथं प्राप्नुयाम्।
यावन्तस्तु गुणा मम श्रुतिगतास्तावन्त एवोदिताः
क्षन्तव्यं क्षितिपाल! चापलमिदं सोढुः क्षमैवोचिता ॥२४॥

शब्दव्यङ्ग्यरसधर्मविशेषैः। उक्तञ्च दर्पणे। रसस्याङ्गित्वमाप्तस्य धर्माः शौर्यादयो यथा। गुणा माधुर्यमोजोऽथ प्रसाद इति ते त्रिधेति। एषां युक्तानां रीत्यादिभिः सम्यक् शोभन्त इति तथोक्तानां, रीतयश्च दर्पणेनोक्ताः। यथा, पदसङ्घटना रीतिरङ्गसंस्थाविशेषवत्। उपकर्त्री रसादीनां सा पुनः स्याच्चतुर्विधेति। सर्वाभिरलङ्कृतिभिरनुप्रासोपमादिभिः। अलङ्कारलक्षणञ्चोक्तं तेनैव। शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः। रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवदिति। शालन्ते शोभन्ते इति तथाभूतानां सुवचसां गद्यपद्यमयाणामपि यावत् सम्यक् रसास्वादनं कलयसे करोषि कर्त्तुं शक्नोषीति यावत्, अतः सतां काव्यानाम् अर्थविभावने तात्पर्यग्रहे एकः अद्वितीयः निपुणः दक्षः प्राज्ञः विशिष्टप्रज्ञाशाली असि, तेन हेतुना अहं तव कीर्त्तिभिः यशोभिः स्यूताः अनुविद्धाः ये गुणादयः दयादाक्षिण्यादयः तेषां वर्णनविधौ कीर्त्तनव्यापारे उत्कण्ठितः उत्सुकः जातः अस्मि। शार्दूलविक्रीडितं वृत्तम् ॥२३॥

यावदिति। यस्य मतिः बुद्धिः यावत् विधावति अभिगच्छति, तेन परं केवलं तावद्धि तावदेव उद्यते वक्तुं शक्यते इति यावत्। अतः निःसीमे सीमारहिते भवतः इह गुणार्णवे गुणसिन्धौ कथं प्रान्तं पारं प्राप्नुयां लभेय? न कथं पारं गन्तुं शक्नुयामित्यर्थः अल्पमतित्वादिति भावः। यावन्त एव गुणाः त्वदीया इति शेषः मम श्रुतिगताः श्रवणगोचरं प्राप्ताः तावन्त एव उदिताः उक्ताः,

अहो विधातुः करुणा प्रजासु ययाक्षराणीह समुत्ससर्ज ।
येभ्योऽक्षरेभ्यो हृदयस्य भावः प्रकाश्यतेऽन्यस्य विबोधनार्थम् ॥२५॥

भावं स्वात्मगुहाशयं न परथा वेद्यं परैर्व्यञ्जयन्
वर्णस्तोममहानिधिर्विधिकृतो लोकोपकाराय यत् ।
तेनैव व्यवहारिणो वयमहो वर्णेषु सर्वे यथा
वर्णाद्यस्त्वमतश्च वर्णतुलया राजन् ! पुरो वर्ण्यसे ॥२६॥

तस्मात् हे क्षितिपाल ! इदं चापलं प्रागल्भ्यं ममेति शेषः क्षन्तव्यं सोढव्यं त्वयेति शेषः, उचितत्वं तत्कुत इत्याह सोढुरिति सोढुः सहनशीलस्य क्षमिण इत्यर्थः क्षमा उचितैव । सामान्येन विशेष-समर्थनरूपोऽर्थान्तरन्यासः । तदुक्तं दर्पणे । सामान्यं वा विशेषेण विशेषस्तेन वा यदि । कार्यञ्च कारणेनेदं कार्येण च समर्थ्यते । साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा ततः इति । शार्दूलविक्रीडितं वृत्तम् ॥२४॥

अहो इति । विधातुः प्रजासु करुणा अनुकम्पा अहो आश्च-र्यम् । यया करुणया इह संसारे अक्षराणि वर्णान् पञ्चाशत-मिति यावत् समुत्ससर्ज सृष्टवान् विधातेति शेषः । उक्तञ्च । षाण्मासिके तु समये भ्रान्तिः संजायते नृणाम् । धात्राक्षराणि सृष्टानि पत्रारूढान्यतः पुरेति । येभ्यः अक्षरेभ्यः हृदयस्य मनसः भावः अन्यस्य विबोधनार्थं विशिष्टज्ञानार्थं प्रकाश्यते । उपजाति-वृत्तम् ॥२५॥

भावमिति । यस्य आत्मनः गुहाशयं हृदयस्थं परथा अन्येन प्रकारेण न वेद्यं न विज्ञेयं भावम् अभिप्रायं परैः अन्यैः व्यञ्ज-यन् प्रकटयन् लोकानाम् उपकाराय वर्णस्तोम एव वर्णावली एव महानिधिः विधिना विधात्रा कृत इति यत् तेनैव महानिधिना एव वयं व्यवहारिणः आचारवन्तः तिष्ठाम इति शेषः अहो आश्चर्यं सर्वे जनाः वर्णेषु अक्षरेषु अक्षराणामिति यावत् यथाः,

वर्ण्यन्ते विषया यैस्ते लोके वर्णा इतीरिताः ।
ज्ञातेषु तेषु वर्णेषु सार्वज्ञ्यात् लब्धवर्णता ॥२७॥
आरात्यकं दुःखमितीह लोके विष्णुर्यथाकारपदाभिधेयः ।
लोकस्य दुःखग्रहणात् त्वमेव राजंस्तथाकारपदेन वाच्यः ॥२८॥
कं सुखं हि कुरुते प्रजापतिस्तेन तस्य विदिता ककारता ।
सर्वलोकसुखकारता यतस्त्वय्यतस्तव ककारता मता ॥२९॥

अधीनाः । त्वञ्च वर्णेषु ब्राह्मणक्षत्रियवैश्यशूद्रात्मकेषु मध्ये आद्यः मुख्यः श्रेष्ठ इत्यर्थः हे राजन् ! अतश्च यस्माच्च कारणात् वर्णतश्च अक्षरसाम्येन पुरः अग्रतः अतःपरमित्यर्थः वर्ण्यसे कीर्त्यसे । शार्दूलविक्रीड़ितं वृत्तम् ॥२६॥

वर्ण्यन्ते इति । यैः विषयाः पदार्थाः वर्ण्यन्ते कीर्त्यन्ते बोध्यन्ते इति यावत् ते लोके वर्णाः अक्षराणीति ईरिताः कथिताः । तेषु वर्णेषु ज्ञातेषु सार्वज्ञ्यात् सर्वविषयज्ञानसम्भारात् लब्धवर्णता विचक्षणता पाण्डित्यमिति यावत् जायते इति शेषः । लब्धवर्णो विचक्षण इत्यमरः । अनुष्टुव्वृत्तम् ॥२७॥

आरात्यकमिति । अकं सुखहीनं दुःखम् आराति आदत्ते इति इह लोके विष्णुः यथा अकारपदेन अभिधेयः वाच्यः अकारशब्देन विष्णुरुक्त इत्यर्थः तथा त्वम् लोकस्य दुःखग्रहणात् एव निश्चये प्रजानां कार्य्यदर्शने हि राज्ञां दुःखं भवतीति भावः अकारपदेन वाच्यः प्रतिपाद्यः । इन्द्रवज्रावृत्तं, स्यादिन्द्रवज्रा यदि तौ जगौ ग इति तल्लक्षणात् ॥२८॥

कमिति । प्रजापतिः कं सुखं कुरुते जनयति हि तेन हेतुना तस्य प्रजापतेः ब्रह्मणः ककारता कशब्दाभिधेयता विदिता लोकै-रिति शेषः कः ब्रह्मा इति उच्यते इति यावत् यतः त्वयि सर्वेषां लोकानां सुखकारता सुखदायित्वम् अस्तीति शेषः अतः

अतोऽसि वर्णादिरनाद्यवर्णो
वर्गोत्तमश्चादिमवर्गरूपः ।
ततोहि लोके मनुजेन्द्र ! चित्रं
सर्वे विरोधास्त्वयि नाशमाप्ताः ॥२०॥

प्रणूयसे येन समस्तलोकैस्तेनैव लोके प्रणवोऽसि राजन् ! ।
धर्मार्थकामत्रयतत्परत्वात् त्वयीव मूर्त्तिर्भवतश्चकास्ति ॥२१॥

अस्मात् कारणात् तव ककारता ककारशब्दप्रतिपाद्यता मता ककार-शब्देन त्वमुच्यसे इति यावत् । इन्द्रवज्रावृत्तम् ॥१९॥

यत इति । हे मनुजेन्द्र ! नृपते ! यतः कारणात् त्वं वर्णादिः वर्णानां ब्राह्मणक्षत्रियवैश्यशूद्राणाम् आदिः श्रेष्ठः इत्यर्थः अथ च अनाद्यवर्णः न तु आद्यवर्णः ब्राह्मण इत्यर्थः वर्गेषु समूहेषु मध्ये उत्तमः यद्वा वर्गेषु यशःसु गुणेषु वा उत्तमः आदिमवर्गरूपः आदिमं श्रेष्ठं वर्गः गुणः रूपञ्च यस्य तथाभूतः असि ततः कारणात् लोके सर्वे विरोधाः त्वयि नाशं विलयम् आप्ताः गताः । यदा त्वं वर्णादिरथच अनाद्यवर्ण इति वर्गोत्तमः आदिमवर्गरूप इति च शब्दतोविरोधोऽपि नास्ति ततः कथम् अन्यतोऽर्थतो विरोधः सम्भवेदिति भावः चित्रमाश्चर्यमेतदिति शेषः । उपजातिवृत्तम् ॥२०॥

प्रणूयसे इति । येन हेतुना समस्तैः लोकैः प्रकर्षेण नूयसे स्तूयसे, हे राजन् ! तेनैव लोके जगति प्रणवः स्तवनीयः ओङ्कारश्च असि । भवतः धर्मार्थकामानां त्रयतत्परत्वात् त्वयीव त्रिवेदीव मूर्त्तिः चकास्ति शोभते यथा त्रिवेदी धर्मार्थकामप्रतिपादकतया शोभते तथा तव मूर्त्तिस्तेषां त्रयतत्परतया शोभते इति यावत् । उपजातिवृत्तम् ।२१॥

शासनात् सर्वलोकानां शास्त्ररूपोऽसि भूपते ।
सर्वस्थितेर्धारणाच्च धर्म इत्यभिधीयसे ॥३२॥

सर्वलोके राजमानः प्रकृतीश्चापि रञ्जयन् ।
सङ्गतार्थं राजशब्दं बिभ्रत् लोकेषु विश्रुतः ॥३३॥

यशःस्तोमे सोमे तव समुदिते भूमिवलये
तमोवृन्दं स्थानं क्वचिदपि यदा नाप नृपते ।
तदा भ्रामं भ्रामं वियति कृतलक्ष्यं गतमदः
स्तमोरूपेणैव स्थितमिति मुधा ज्योतिषकथा ॥३४॥

सत्कीर्त्तिपूर्त्तिनिवहेन धरातले ते
वर्णान्तरापहरणात् धवलीकृतेऽस्मिन् ।

शासनादिति । हे भूपते ! त्वं सर्वलोकानां शासनात् शास्त्रं रूपं यस्य तथाभूतः असि, सर्वेषां स्थितेः मर्यादायाः धारणाच्च धर्म इति अभिधीयसे कथ्यसे । अनुष्टुब्वृत्तम् ॥३२॥

सर्वलोके इति । सर्वस्मिन् लोके जगति राजमानः दीप्यमानः प्रकृतीः प्रजाः रञ्जयंश्च लोकेषु सङ्गतार्थम् अन्वर्थं राजशब्दं बिभ्रत् विश्रुतः प्रख्यातः असि । अनुष्टुब्वृत्तम् ॥३३॥

यश इति । हे नृपते ! तव यशसां स्तोमे राशौ सोमे चन्द्रे भूमिवलये भूमण्डले समुदिते सति तमोवृन्दं ध्वान्तराशिः यदा क्वचिदपि स्थानं न आप न लेभे, तदा तमोवृन्दं भ्रामं भ्रामं पुनः पुनः भ्रमित्वेत्यर्थः वियति आकाशे कृतलक्ष्यं गतम् । अदः वियत् आकाशं तमोरूपेणैव स्थितमिति ज्योतिषाणां ज्योतिर्विदां कथा मुधा मिथ्या । शिखरिणीवृत्तम् ॥३४॥

सत्कीर्त्तीति । हे नृप ! ते तव सतीनां कीर्त्तिपूर्त्तीनां निवहेन समूहेन वर्णान्तराणां नीलपीतादीनाम् अपहरणात् धवलीकृते शुक्लीकृते अस्मिन् धरातले वर्णेषु ब्राह्मणक्षत्रियवैश्यशूद्रेषु मध्ये

वर्णेषु भेदरहिता इह सर्वलोकाः
चित्रं त्वदीयविषये नृप ! वर्णभेदः ॥२५॥
त्वदीयकीर्त्त्या सितया नृपाल !
सर्वेषु वर्णेषु निवारितेषु ।
चित्रं त्वदीये विषये समन्तात्
सर्वेऽपि लोकाः किल लब्धवर्णाः ॥२६॥
कुन्देन्दुसुन्दररुचा तव कीर्त्तिपूर्त्या
ध्वस्तं गुहास्थमपि यत् तम एतदेव ।
व्योमापि तद्भयवशात् किल कीर्त्तिबन्धुं
चन्द्रं समाश्रितमहो न विधौ कलङ्कः ॥२७॥

सर्वे लोकाः भेदरहिताः समभावेन ऐकमत्येन स्थिता इति यावत् किन्तु चित्रम् आश्चर्य्यम् इह त्वदीयविषये त्वद्राज्ये इति यावत् वर्णभेदः वर्णानां ब्राह्मणादीनां भेदः विशेषः गौरवलाघव बोधकेति शेषः ब्राह्मणाः सर्वेषु माननीयाः ततः क्षत्रियास्ततो वैश्यास्ततः शूद्रा इत्येवं यथायथं भवता समादरः क्रियते इति भावः । वसन्ततिलकं वृत्तम् ॥२५॥

त्वदीयेति । हे नृपाल ! सितया श्वेतया तव कीर्त्त्या सर्वेषु वर्णेषु नीललोहितादिषु अथच ब्राह्मणादिषु इति विरोधः निवारितेषु तिरोहितेषु सत्सु त्वदीये विषये राज्ये समन्तात् सर्वेऽपि लब्धवर्णाः ब्राह्मणादयः अथच नीललोहितादय इति विरोधः लब्धवर्णाः विचक्षणाः पण्डिता इत्यर्थः अथच प्राप्तनीललोहितादिवर्णाः इति विरोधः चित्रं किल आश्चर्य्यमेतत् । उपजातिकान्तय इति विरोधः चित्रं किल आश्चर्य्यमेतत् । उपजातिवृत्तम् ॥२६॥

कुन्देति । कुन्दवत् इन्दुवच्च सुन्दरी कान्तिर्यस्याः तथाभूतया तव कीर्त्तिपूर्त्या यशःस्तोमेन गुहास्थमपि गर्त्तस्थमपि यत्

भूमण्डलादपहृता यशसेन्दुना या
तस्यापकारकरणाय कृतोद्यमा ते ।
तद्बन्धुचन्द्रमनघं ग्रसतीव रोषात्
राहुच्छलेन किल भूप ! तमस्ततिः सा ॥३८॥

विश्वरूपपरिचिन्तयानिशं विश्वरूपधरतामुपेयिवान् ।
यो हि यत्र मन आदधे चिरं तेन तस्य किल रूपमाप्यते॥ ३९ ॥

विश्वात्मकोऽपि यतसे कमलोदयार्थं
लोकेषु धर्मजननात् तमसो निरासात् ।

तमः ध्वस्तं निरस्तम् एतत् तमः व्योम आकाशम् एत्यापि आग-त्यापि तव भयवशात् तव कीर्त्तिबन्धुं चन्द्रं समाश्रितं बन्धोरनुरोधेन यदि मां रक्षतीति धियेति भावः असौ विधौ चन्द्रे कलङ्कः न । वसन्ततिलकं वृत्तम् ॥३७॥

भूमण्डलादिति । हे भूप ! तव यशसा इन्दुना चन्द्रेण या तमसां ततिः समूहः भूमण्डलात् अपहृता दूरीकृता, सा ते तव तस्य यशसः अपकारकरणाय कृतोद्यमा उद्यमवती सती राहु-च्छलेन अनघं निर्मलं तस्य यशसः बन्धुं चन्द्रं रोषात् ग्रसतीव किम । वसन्ततिलकं वृत्तम् ॥३८॥

विश्वेति । त्वम् अनिशं निरन्तरं विश्वरूपस्य परमात्मनः परि-चिन्तया विश्वरूपधरतां पृथिवीधारकत्वम् ईश्वररूपधरत्वञ्च उपेयि-वान् प्राप्तवान् असि । हि यतः यः जनः यत्र यस्मिन् विषये मनः चिरम् आदधे आहितवान् तेन तस्य रूपम् आप्यते लभ्यते किलेति प्रसिद्धौ । इन्द्रवज्रावृत्तम् ॥३९॥

विश्वात्मक इति । विश्वात्मकः विश्वरूपोऽपि लोकेषु जगत्सु धर्मजननात् धर्मसंस्थापनात् तमसः अन्धकारस्य निरासाच्च कम-लायाः लक्ष्म्याः उदयार्थं वृद्ध्यर्थं यतसे चेष्टसे । तेजसां सहस्रस्य

तेजःसहस्रनिलयो जगतां पतिश्च
भास्वांश्च नो खरकरः प्रथितः पृथिव्याम् ॥४०॥
कलयन् सकलाः कलाः सदा
रचयन् कौमुदमुद्विजृम्भणम्।
द्विजराजोऽसि कलङ्कभागितां
न च दोषाकरताञ्च नाश्रितः ॥४१॥
भूमिनन्दनतां बिभ्रत् रक्ताङ्गत्वञ्च धारयन्।
मङ्गलोऽपि महीपाल! वक्रत्वं न समाश्रितः ॥४२॥

निलयः [illegible] सहायतम इति यावत् जगतां पतिः भास्वांश्च [illegible] दीप्यमानश्च किन्तु पृथिव्यां खरकरः तीक्ष्णकिरणः अथच लोकानां सुखदराजाश्रयाऽत्ययः प्राथतः प्रसिद्धः नासि। वसन्ततिलकं वृत्तम्। व्यतिरेकालङ्कारः ॥४०॥

कलयन्निति। सदा सकलाः समग्राः कलाः विद्या इति यावत् अवयवविशेषांश्च कलयन् धारयन् कौ पृथिव्यां मोदन्ते इति कौमुदाः लोका इति यावत् तेषां मुदः आनन्दस्य विजृम्भणं प्रकटनं कुमुदानामिदं कौमुदो मा चासौ मुच्चेति कौमुदमुद् तस्याः सविजृम्भणम् उद्दीपनं रचयन् कुर्वन् द्विजराजः चन्द्रः अथच द्विजेषु ब्राह्मणक्षत्रियवैश्येषु मध्ये राजते इति तयोक्तः असि भवसि, किन्तु कलङ्कभागितां न दोषाकरताञ्च न आश्रितः। चन्द्रो हि कलङ्की दोषाकरः निशाकर इति भावः, त्वन्तु निष्कलङ्कः निर्दोषश्चेति व्यतिरेकालङ्कारः। तदुक्तं दर्पणे। आधिक्यमुपमेयस्योपमानान्न्यूनताथवा। व्यतिरेक इति ॥४१॥

भूमीति। हे महीपाल! त्वं भूमेः पृथिव्याः नन्दनताम् आनन्दजनकत्वं बिभ्रत् दधानः रक्तानि अनुरक्तानि अङ्गानि अमात्यादीनि प्रकृतयः यस्य स रक्ताङ्गः तस्य भावः तद्, स्वाम्यमात्यसुहृत्-

द्विजवरगणराजं नन्दयन् सौम्यमूर्त्तिः
प्रथितबुधसमाख्यो रोहिणीनन्दनश्च ।
नरपतितिलकस्त्वं राजपुत्रत्वमाप्तः
खरतरकरयोगं नाश्रितस्त्वं कदाचित् ॥४३॥
गिराम्पतिर्जिष्णुमतः कचान्वित-
स्तारापतिश्चित्रशिखण्डिभूषितः ।

कोषराष्ट्रदुर्गबलानि च । राज्याङ्गानि प्रकृतय इत्युक्तेः । धारयन् मङ्गलः शुभकरः अथच मङ्गलग्रहोऽपि वक्रत्वं कौटिल्यं वक्राकारत्वञ्च न आश्रितः । मङ्गलग्रहो हि भूमिसुतः रक्तवर्णः वक्राकारश्चेति भावः । अत्रापि व्यतिरेकः । अनुष्टुब्वृत्तम् ॥४२॥

द्विजेति । त्वं द्विजवरेण सह गणराजः गणेशः द्विजवरगणराजः तं ब्राह्मणश्रेष्ठं गणपतिञ्चेत्यर्थः पक्षे द्विजवरगणराजं चन्द्रं पितरमिति भावः नन्दयन् हर्षयन् सौम्यमूर्त्तिः शान्ताकृतिः पक्षे सोमस्य इयं सौम्या मूर्त्तिर्यस्य तथोक्तः आत्मा वै जायते पुत्र इति श्रुतेः पुत्रस्यात्ममूर्त्तित्वप्रतिपादनादिति भावः प्रथिता ख्याता बुधेषु विद्वत्सु समाख्या सम्यक् नाम पक्षे बुध इति समाख्या यस्य तथोक्तः रोहिणीनां धेनूनां नन्दनः गवां प्रतिपालक इति भावः पक्षे रोहिण्यास्तदाख्याया मातुर्नन्दनः आनन्दजननः नरपतीनां राज्ञां तिलकः ललाटभूषणभूत इत्यर्थः राजपुत्रत्वं नृपतितनयत्वं पक्षे राज्ञश्चन्द्रस्य पुत्रत्वम् आप्तः, किन्तु कदाचिदपि त्वं खरतरकरयोगं तीक्ष्णतरराजभागग्राहित्वमित्यर्थः पक्षे खरतरकरस्य सूर्य्यस्य योगं न आश्रितः न प्राप्तः । बुधग्रहो हि कदाचित् सूर्य्यसङ्गमाप्नोतीति भावः । व्यतिरेकालङ्कारः । मालिनीवृत्तं, ननमयययुतेयं मालिनी भोगिलोकैरिति तल्लक्षणात् ॥४३॥

गिराम्पतिरिति । त्वं गिरां वाचां पतिः सरस्वतीपतिरित्यर्थः विद्वानिति भावः पक्षे बृहस्पतिः । जिष्णु जयसाधनं मतम् अभि-

गुरुर्नियन्ताश्रमवृत्तिशिक्षणात्
परं न चार्वाकमतप्रवर्त्तकः ॥ ४४ ॥
कविश्च काव्यप्रणयात् सदा त्वं
नीत्यादिशास्त्रेषु च पारदृश्वा ।
सदोदयस्ते भुवि तीक्ष्णतेजः-
सम्पर्कता नास्ति मनाक् कदाचित् ॥४५॥

प्रायो विचेष्टितमिति भावः यद्वा तथाभूतः पक्षे जिष्णुना इन्द्रेण सतः सम्मानितः जिष्णुर्लेखर्षभः शक्र इत्यमरः । कचैः केशैः अन्वितः युक्तः सुकेशः इति भावः पक्षे कचेन तन्नाम्ना निजपुत्रेण अन्वितः । तारा महाविद्याविशेषः तां पाति रक्षति उपास्ते इति भावः तथोक्तः पक्षे तारानाम्नी भार्य्या तस्याः पतिः । चित्रैः मनोहरैः शिखण्डिभिः मयूरैः भूषितः अलङ्कृतः समन्तात् पोषितमयूराणां सद्भरणादिति भावः पक्षे चित्रशिखण्डिना आङ्गिरसा स्वपित्रेति भावः भूषितः शोभितः सप्तर्षिपुत्रत्वेनेति भावः । गुरुः श्रेष्ठान् पक्षे आचार्य्यः आश्रमाणां ब्रह्मचारिप्रभृतीनां ब्रह्मचारी गृही वानप्रस्थो भिक्षुश्चतुष्टये । आश्रमोऽस्त्रीत्यमरः । वृत्तिः आचारः तस्याः शिक्षणात् प्रवर्त्तनात् उपदेशादिति च नियन्ता शास्ता पक्षे शास्त्रकर्त्ता, परं किन्तु चार्वाकाणां बौद्धमतावलम्बिनां मतस्य प्रवर्त्तकः प्रचारकः न असीति शेषः । वृहस्पतिर्हि चार्वाकमतप्रणेता त्वन्तु न तथा केवलं वैदिकधर्मप्रवर्त्तक इति व्यतिरेकालङ्कारः ॥४४॥

कविश्चेति । त्वं काव्यप्रणयनात् काव्यरचनात् पक्षे काव्यस्य स्मृतेश्च प्रणयनात् उत्पादनात् कविः पक्षे शुक्रः । सदा नीत्यादिशास्त्रेषु च पारदृश्वा विचक्षणः उभयत्र समानम् । ते तव भुवि पृथिव्यां सदा उदयः उन्नतिः । किन्तु कदाचित् मनाक् ईषत् अपि

प्राणिहिंसाभयेनेव पद्भ्यां मन्दं चरन् भुवि ।
शनैश्चरोऽसि मित्रस्य नन्दनात् क्रूरता न वै ॥४६॥
छायया भूमिमाश्रित्य चन्द्राकौं तेजसा ग्रसन् ।
राहुत्वं प्राप्तवान् राजन्! न चागुत्वमवाप्तवान् ॥४७॥
वैरिव्यूहविनाशनाय जगतामुत्पातकेतुर्भवान्
क्रान्तौ खेचरगास्त्वदीयवशगास्तेनासि पाता सताम् ।

तीक्ष्णतेजसः खरप्रतापस्य पक्षे सूर्य्यस्य सम्पर्कता नास्ति । अत्रापि व्यतिरेकः ॥४५॥

प्राणीति । त्वं भुवि पृथिव्याः प्राणिनां हिंसाभयेनेव पद्भ्यां मन्दं चरन् सौम्यभावेन विचरन् कार्य्यं सम्पादयन्निति यावत् पक्षे मन्दं तदाख्यां चरन् लभमानः शनैश्चरः शनैः मन्दं चरतीति तथोक्तः पक्षे शनिग्रहोऽसि किन्तु मित्रस्य बन्धुजनस्य नन्दनात् आनन्दजननात् पक्षे सूर्य्यस्य नन्दनात् आनन्दजननात् सूर्य्यतनयत्वादिति भावः ते तव क्रूरता निष्ठुरता न अस्तीति शेषः । शनिपक्षे अतिनिष्ठुरः त्वन्तु तथा नेति व्यतिरेकः ॥४६॥

छाययेति । हे राजन्! त्वं छायया दीप्त्या पक्षे अनातपेन भूमिम् आश्रित्य तेजसा चन्द्राकौं ग्रसन् पराभवन् राहुत्वम् आप्तवान्, किन्तु नास्ति गौः किरणः प्रभाव इति यावत् यस्य सः अगुः निष्प्रताप इत्यर्थः पक्षे नास्ति गौः शिरो यस्य तथोक्तः निर्मस्तक इत्यर्थः तस्य भावः तत् न च अवाप्तवान् न लब्धवान् । व्यतिरेकालङ्कारः ॥४७॥

वैरीति । भवान् वैरिणां शत्रूणां व्यूहः सज्जितं बलं, व्यूहस्तु बलविन्यास इत्यमरः । तस्य विनाशाय जगताम् उत्पातकेतुः अमङ्गलकेतुः । खेचरगाः देवानुगामिनः देवयाजकाः ब्राह्मणा इति यावत् पक्षे खेचरान् आकाशचारिणः नक्षत्राणीति यावत् गच्छन्तीति तथोक्ताः सूर्य्यादिग्रहा इत्यर्थः, क्रान्तौ रविसंक्रमदिने

चित्रास्ते शतशः शिखाः समुदिता वृद्धेश्च वीर्यस्य च
जाने नासुरयोनिरङ्ग तमिदं लोकेषु तद् विश्रुतम् ॥४८॥

विघ्नानां वारणाल्लोके गणराजत्वमागतः।
तव नो रामवैरित्वं दाने न वारणास्यता ॥४९॥

भवान् शक्तिधरः साक्षात् सेनानीत्वमुपागतः।
सुकुमारो महीपाल ! न च प्राप्तः कुमारताम् ॥५०॥

पक्षे खमार्गमध्यवर्तिन्या तिरश्चीनरेखायां त्वदीयवंशगाः तव वंशं गच्छन्ति संक्रान्तौ दानस्य प्राशस्त्यात् त्वत्सकाशात् बहूनि धनानि लभन्ते इति भावः, तेन हेतुना तु भोः पाता रक्षिता पालयितेति यावत् तच्चे पातः तदाख्यपडविशेषः मतः कथितः। ते तव वृद्धेः वीर्यस्य च चित्राः बहुविधाः शतशः शिखाः प्रतापा इति भावः पक्षे ज्वालाः समुदिताः सम्यक् उदयं प्राप्ताः। इदम् अद्भुतं तत् लोकेषु प्रसिद्धं त्वद्रूपं वास्तीति भावः न असुरयोनिः असुरः राहुः योनिर्यस्य स तथोक्तः राहुत्पन्नः केतुरित्यर्थः न इति जाने। तव केतुधर्मशालित्वेऽपि तत्त्वं त्वयि नास्तीति भावः। शार्दूलविक्रीडितं वृत्तम् ॥४८॥

विघ्नानामिति। त्वं लोके जगति विघ्नानां वारणात् दूरीकरणात् गणराजत्वं गणेशत्वम् आगतः प्राप्तः गणेशस्य विघ्नहरत्वं प्रसिद्धम्। किन्तु तव दाने रामेण परशुरामेण वैरित्वं शत्रुभावः नो कदाचित् गणपतिः पितृशिष्याय जामदग्न्याय पृथिवीं जित्वा कश्यपाय दत्तवते विद्वेषमकरोदिति पुराणवार्त्तानुसन्धेया। न च वारणास्यता गजाननत्वम्। त्वन्तु रामस्य वैरी न गजाननस्येति व्यतिरेकालङ्कारः। अनुष्टुब्वृत्तम् ॥४९॥

भवानिति। हे महीपाल ! भवान् शक्तिधरः प्रभावसम्पत् साङ्गशक्तिसम्पन्न इति यावत् पक्षे शक्तिनामास्त्रधारी अतः साक्षात् सेनानीत्वं बलाधिपतित्वं पक्षे कार्त्तिकेयत्वं, सेनानीरग्निभूर्गुह इत्य

विभूतिभूषितो भूप! तारानाथकृतेक्षणः।
गामाश्रित्य शिवो भूत्वा न प्राप्तः कामवैरिताम् ॥५१॥

विद्वन्मानसहंसवासनिरतो वाण्या च कण्ठे श्रितो
हस्ते साक्षकमण्डलुर्नरपते! सूत्रं च बिभ्रद् गले।
वेदानध्ययनादिभिर्बहुलयन्स्वैश्चतुर्भिर्मुखैः
त्वं ब्रह्मत्वमुपागतोऽपि जरसा नाक्रान्त इत्यद्भुतम् ॥५२॥

नरः। उपागतः प्राप्तः। सुकुमारः सुकोमलाङ्गः सुन्दराकार इत्यर्थः किन्तु कुमारतां शिशुत्वं न च प्राप्तः। तव बाल्यव्यवहारो नास्ति विचक्षणतापूर्वकमेव व्यवहरसीति भावः। अनुष्टुब्वृत्तम्। व्यतिरेकालङ्कारः ॥५०॥

विभूतीति। हे भूप! त्वं विभूतिभिः सम्पद्भिः पक्षे भस्मभिः, भूतिर्भस्मनि सम्पदीत्यमरः। भूषितः अलङ्कृतः तारानाथे शङ्करे कृतम् ईक्षणं दर्शनम् अभिनिवेश इति भावः येन तथोक्तः शिवोपासक इति भावः पक्षे तारानाथेन चन्द्रेण कृतं भूषितम् ईक्षणं तृतीयं नेत्रं यस्य तथाभूतः, गां पृथिवीं पक्षे वृषभम् आश्रित्य शिवः शुभकरः लोकानामिति शेषः पक्षे तदाख्यः भूत्वा कामवैरितां काम्यन्ते इति कामाः विषयाः तेषां वैरितां शत्रुतां ध्वंसकारित्वमिति यावत् पक्षे मदनरिपुतां न प्राप्तः प्रत्युत कामानां वर्द्धक एव भवानिति भावः। अनुष्टुब्वृत्तम्। व्यतिरेकालङ्कारः ॥५१॥

विद्वदिति। हे नरपते! त्वं विदुषां मानसं हंस इव तस्मिन् वासे निरतः सदा विदुषां मनःसु अधिष्ठित इत्यर्थः पक्षे विदुषां मानसमेव हंसः स्ववाहनभूत इति यावत् तस्मिन् वासे निरतः आसक्तः। वाण्या वाग्देव्या कण्ठे श्रितः कण्ठवर्त्तिविद्य इत्यर्थः पक्षे वाग्देव्या सरस्वत्या स्वपत्न्येति भावः कण्ठे श्रितः आलिङ्गित इत्यर्थः। हस्ते अक्षेण जपमालया कमण्डलुना च सहितः, गले सूत्रं यज्ञोपवीतं बिभ्रत् दधानः चतुर्भिर्मुखैः उपायैः अध्ययनादिभिः अधीति

नित्यं सत्वसमाश्रितो द्विजगतिर्लक्ष्मीपतिर्भूपते !
देवानां हितकृत्सतां गतिरहो वैकुण्ठधामाश्रितः ।
गोलोकैकविभूषणं च शरणं भक्तस्य कामप्रसू-
विष्णुस्त्वं बलिदासतां न च गतो जानेऽतिचित्रं महत् ॥५३॥

वाचाचरणप्रचारणैरित्यर्थः वेदान् उच्चैरतिशयेन बहुलयन् विस्तारयन् पक्षे चतुर्भिर्मुखैः वदनैः अध्ययनादिभिः वेदान् उच्चैरत्यर्थं बहुलयन् विस्तारयन् ब्रह्मत्वम् उपागतः प्राप्तोऽसि, किन्तु जरसा वार्द्धक्येन न आक्रान्तः नाभिभूतः इति अद्भुतम् आश्चर्यम् । ब्रह्मा हि जराजीर्णस्त्वन्तु न तथेति व्यतिरेकः । शार्दूलविक्रीडितं वृत्तम् ॥ ५२ ॥

नित्यमिति । हे भूपते ! नित्यं सततं सत्त्वेन उत्साहेन पक्षे सत्त्वगुणेन समाश्रितः युक्तः, द्विजानां ब्राह्मणानां गतिः आश्रयः पक्षे द्विजेन पक्षिणा गरुड़ेनेत्यर्थः, दन्तविप्राण्डजा द्विजा इत्यमरः । गतिर्गमनं यस्य तथाभूतः गरुड़वाहन इति यावत्, लक्ष्म्याः राजश्रियाः पक्षे कमलायाः पतिः, देवानां हितकृत् यागानुष्ठानेन पक्षे असुरदलनेनेति भावः सतां साधूनां गतिः आश्रयः पक्षे परित्राता, अहो आश्चर्यं वैकुण्ठं निःशङ्कितं धाम आलयं दुर्गमिति यावत् आश्रितः पक्षे वैकुण्ठाख्यस्थानस्थितः, गोलोकानां पृथिवीस्थमानवानां पक्षे गोलोकस्य तदाख्यभुवनस्य एकम् अद्वितीयं विभूषणम् अलङ्कारभूतः तेषां रक्षणादिति भावः पक्षे गोलोकस्य भक्तस्य अनुरक्तजनस्य पक्षे भक्तिभाजः सेवकस्य शरणं रक्षिता, शरणं गृहरक्षित्रोरित्यमरः । कामप्रसूः लोकानाम् अभीष्टपूरकः उभयत्र समानम् । अतएव विष्णुरसि किन्तु बलिदासतां बलेरसुरराजस्य दासतां न च गतः न प्राप्तः । विष्णुस्तस्य समानधर्मा किन्तु न कस्यचिद् दासत्वं गतः त्वन्तु न कस्यापीति भावः अतः महत् अतिचित्रम् अत्याश्चर्यम् एतत् इति जाने मन्ये । व्यतिरेकालङ्कारः । शार्दूलविक्रीडितं वृत्तम् ॥५३॥

धर्मेण राजसे यस्मात् ततस्ते धर्मराजता ।
प्रजासु दण्डधरता सम्मता न तु कालता ॥५४॥

श्रीदः पुण्यजनेश्वरश्च नृपते ! भूतेशबन्धुस्तथा
जातोऽपि प्रथितः कुवेरपदभाक् नैवासि चित्रं हि तत् ।
पाशाढ्यो नृप ! वाहिनीपतिरथो पश्चाद्दिगीशोऽपि यत्
तच्चित्रं न च वारुणीमधिगतो नो वा जडेशो भवान् ॥५५

धर्मेणेति । त्वं यस्मात् धर्मेण राजसे राजकार्य्यं करोषि, ततः कारणात् ते तव धर्मराजता यमत्वं सिद्ध्यतीति शेषः । प्रजासु दण्डधरता शास्तृत्वं सम्मता, किन्तु कालता कलनात् कालः तस्य भावः कालता संहारत्वमिति न अस्तीति शेषः । त्वं यमस्य समदर्शितया शास्तृत्वमनुकरोषि किन्तु तस्य निकृष्टकर्मलोकसंहारकत्वं न गृह्णासीति व्यतिरेकः । अनुष्टुब्वृत्तम् ॥५४॥

श्रीद इति । हे नृपते ! त्वं श्रियं सम्पदं ददाति लोकेभ्य इति श्रीदः पक्षे श्रीदः तदाख्यः पुण्यजनानां विशुद्धचरितानां साधूनामित्यर्थः ईश्वरः अधिपः अग्रणीरिति यावत् पक्षे तदाख्यः श्रीदः पुण्यजनेश्वर इति कुवेरपर्य्यायविवरः । तथा भूतेशः शिवः बन्धुः प्रियः यस्य तथोक्तः शिवसेवक इति यावत् पक्षे हरसखः । जातोऽपि प्रथितः विख्यातः कुवेरपदं कुत्सितशरीरपदवाच्यं भजते इति तथाभूतः, कुत्सायां किंतिशब्दोऽयं शरीरं वेरमुच्यते । कुवेरः कुशरीरत्वादिति पुराणम् । नैव असि नैव भवसि, तत् हि चित्रम् आश्चर्य्यं कुवेरगुणयुक्तोऽपि कुवेरो नासीति व्यतिरेकः । हे नृप ! त्वं पाशाढ्यः पाशक्रीड़ाशीलः पक्षे पाशास्त्रयुक्तः, वाहिनीपतिः सेनापतिः पक्षे नदीनाथः अथ किञ्च पश्चाद्दिगीशः पश्चिमाया दिशः ईशः अधिपतिः अपि भवान् वारुणीं सुरां पक्षे वरुणपालितां दिशं पश्चिमामित्यर्थः न च अधिगतः न प्राप्तः न सुरापायीति भावः, नो वा जड़ानां मूर्खाणाम् ईशः अग्रणीरित्यर्थः पक्षे जलानाम् ईशः स्वामी जला-

जाने शुभ्रमतङ्गजाधिपतितां जीवे च ते गौरवं
स्वर्गवासिसलोकतां नरपते ! लोकाधिपत्यं तथा ।
शास्त्रेषु प्रथितं सहस्रनयनत्वञ्चेति सूक्ष्मेक्षणात्
पौरस्त्येषु समादरो न च तवेत्येतद्धि चित्रं महत् ॥५६॥

मित्रोदयाय यतसे सततं पुरस्तात्
तत्रस्थलोकनिवहांस्त्वयि रागयुक्तान् ।
मुक्तान्यदेशनिकरेषु वसुप्रदोऽभूः
पौरस्त्यवासिषु कथं न वसुप्रचारः ॥ ५७ ॥

धिपतिरित्यर्थः तत् चित्रम् आश्चर्यं भवतः वरुणधर्मित्वेऽपि वरुणपतेः निकृष्टधर्मवत्त्वं नास्तीति व्यतिरेकः । शार्दूलविक्रीडितं वृत्तम् ॥५५॥

जाने इति । हे नरपते ! ते तव शुभ्रमातङ्गजानां शुद्धदन्तहस्तिनां पक्षे शुभ्रमातङ्गस्य श्वेतगजस्य ऐरावतस्येत्यर्थः अधिपतितां तथा जीवे प्राणिवर्गे पक्षे बृहस्पतौ स्वस्य आचार्ये इति भावः गौरवं सम्मानं स्वर्गवासिनां देवानां सलोकतां समानलोकभागित्वं स्वर्गवासाधिकारित्वमिति यावत् पक्षे स्वर्गवासिनां सलोकतां सालोक्यं, लोकानां जनानां पक्षे त्रयाणां भुवनानां, लोकस्तु भुवने जने इत्यमरः । आधिपत्यं स्वामित्वं तथा सूक्ष्मेक्षणात् सूक्ष्मदर्शनात् सुविचारकरणादिति भावः शास्त्रेषु प्रथितं प्रसिद्धं सहस्रमिव नयनानि यस्य तथोक्तः तत्त्वं पक्षे सहस्रनेत्रत्वञ्च जाने । किन्तु तव पौरस्त्येषु पूर्वदिग्भवेषु प्राणिषु न च समादरः केवलमिति शेषः । इन्द्रस्य पूर्वदिगधिपतित्वात् तस्यामेव दिशि समादरः तव नास्तीति व्यतिरेकः । एतद्धि एतदेव महत् चित्रम् आश्चर्यम् । शार्दूलविक्रीडितं वृत्तम् ॥५६॥

मित्रोदयायेति । त्वं सततं पुरस्तात् अग्रतः पूर्वस्यां दिशि च मित्राणां सुहृदां पक्षे मित्रस्येव सूर्यस्येव उदयाय यतसे चेष्टसे, त्वयि रागयुक्तान् अनुरागिणः पक्षे स्वकिरणेनारुणितान् तत्रस्थ

गिरीशसेवनान्मूर्ध्ना वर्त्मत्रयविभूषणात् ।
गङ्गात्वमाश्रितो भूप ! निम्नगत्वं न चाश्रितः ॥५८॥
रामकृष्णासेवनेन गङ्गासङ्गमनेन च ।
मित्रप्रियत्वाद् यमुनाभावेऽपि तव शुद्धता ॥५९॥
मुख्यार्चिर्न तु सर्वभक्षको
द्विजराजो न कलङ्कभूषितः ।

लोकनिवहान् त्वत्सम्मुखवर्त्तिनो लोकानित्यर्थः पक्षे पूर्वदिग्वर्त्तिनो लोकान् हत्वा त्यक्त्वा अन्यदेशनिकरेषु अन्येषु देशसमूहेषु वसुप्रदः धनवर्षी पक्षे किरणदः अभूः, पौरस्त्यवासिषु पूर्वदिग्वासिषु कथं तव वसुप्रचारः धनवितरणं न पक्षे किरणदानं न। एतेन पूर्व-दिग्वासिभ्यः अस्मभ्यं तव धनदानमुचितमिति व्यज्यते। वसन्त-तिलकं वृत्तम् ॥५७॥

गिरीशेति। हे भूप! त्वं मूर्ध्ना शिरसा गिरीशस्य सेवनात् पक्षे मूर्ध्ना शिरसा गिरीशस्येति भावः अवच्छेदे तृतीया मूर्ध्नि गिरीशस्य सेवनादिति यावत् तथा वर्त्मनां त्रयस् उत्तममध्यमाधम-त्रिविधदण्डरूप आचार इति भावः त्रिपथं तस्य विभूषणात् अलङ्कर-णात् त्रिविधमार्गेण राजकार्यस्य शोभासम्पादनादिति भावः पक्षे गमनेन शोभाजननादित्यर्थः गङ्गात्वम् आश्रितः प्राप्तः न च न तु निम्नं गच्छतीति तथोक्ता तस्य भावः तत् नीचमार्गावलम्बित्व-मिति यावत् आश्रितः। गङ्गा निम्नगा त्वन्तु न तथेति व्यति-रेकः ॥५८॥

रामेति। रामकृष्णयोरासेवनेन गङ्गायाः सङ्गमनेन च मित्राणां सुहृदां पक्षे मित्रस्य सूर्यस्य प्रियत्वात् एकत्र सद्व्यव-हारात् अन्यत्र आत्मसम्भवत्वादिति भावः तव यमुनाभावे यमुनात्वे सत्त्वेऽपि शुद्धता निर्मलता अस्तीति शेषः। यमुनाजलं मलिनं त्वन्तु निर्मल इति व्यतिरेकः। अनुष्टुब्वृत्तम् ॥५९॥

धनदोऽपि कुवेरतां त्यजन्
कमलेशोऽपि न वा जनार्दनः ॥६०॥
कुशासनरतोऽपि त्वं कुशासनविवर्जितः ।
दानवारिसेवकोऽपि दानवारिविवर्जकः ॥६१॥
कलयसि कलिमलनाशं भजसि च जगदावासम् ।
चलयसि विनतत्रासं रचयसि नृप! सुरवासम् ॥६२॥

सुशुचिरिति । त्वं सुशुचिः सुपवित्रः पक्षे शोभनः अग्निः न तु सर्वभक्षकः, द्विजराजः द्विजेषु ब्राह्मणक्षत्रियवैश्येषु राजते इति तथोक्तः पक्षे चन्द्रः, द्विजराजः शशधर इत्यमरः । न कलङ्क-भूषितः न कलङ्कीत्यर्थः । धनदः धनदाता पक्षे धनपतिरपि कुवे-रतां कुत्सितशरीरतां त्यजन्, कमलेशः श्रीपतिरपि जनान् अर्दतीति तथोक्तः जनपीडकः न वा नैवेत्यर्थः । व्यतिरेकालङ्कारः ॥६०॥

कुशासनेति । त्वं कुशासनरतः कुशनिर्मितासनोपविष्टोऽपि कुशासनात् कुत्सितभावेन राज्यस्य शासनात् विवर्जितः विरहितः, दानवानाम् अरिः विष्णुः तस्य सेवकोऽपि दानवारिविवर्जकः तुभ्यमिदं ददामि तुभ्यमिदं ददामीत्येवं धनोत्सर्गवाक्ये जलत्याग-कारीत्यर्थः । अत्र श्लेषानुप्राणितं यमकम् । उक्तञ्च दर्पणे । सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः । क्रमेण तेनैवावृत्तिर्यमकं विनि-गद्यते । इति श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते इति । अनु-ष्टुब्वृत्तम् ॥६१॥

कलयसीति । हे नृप ! कलेः पापयुगस्य मलनाशं पापक्षय कलयसि करोषि, जगदावासं जगन्निवासं विष्णुं भजसि आरा-धयसि च । विनतानां शरणागतानां त्रासं भयं चलयसि निरा-करोषि, सुराणां देवानां वासं वासस्थानं मन्दिरमित्यर्थः रचयसि संस्थापयसि ॥६२॥

नानातीर्थसमाश्रयो द्विजकुलेनाराधितो भूयसा
शश्वत् सौरभशालिनां सुमनसामुल्लासहेतुस्तथा ।
गम्भीरोऽतिदुरासदोऽहितजुषां पद्मैकभूमिर्भवान्
मन्ये कोऽपि जलाशयोऽसि महतां तापस्य संशान्तये ॥६३

शङ्खचक्रपरिचिह्नितः करे
पादयोर्ध्वजमुखादिलाञ्छितः ।
मालया वनजया च शोभितो
वैष्णवाङ्कमखिलं त्वमाश्रितः ॥६४॥

सर्वेषां तापनाशाय दक्षिणो मलयाचलः ।

नानेति । भवान् नानातीर्थानां बहूनां साधूनां समाश्रयः गतिः पक्षे बहुजनावतरणमार्गाणां समाश्रयः विविधतीर्थशोभित इति भावः, भूयसा बहुना द्विजकुलेन विप्रवृन्देन पक्षे पक्षिसमूहेन आराधितः सेवितः शश्वत् सततं सौरभशालिनां सुविख्यातानामित्यर्थः पक्षे सुगन्धवतां सुमनसां मनस्विनां पक्षे पुष्पाणाम् उल्लासहेतुः हर्षहेतुः पक्षे विकाशहेतुः गम्भीरः दुरवगाहप्रकृतिः पक्षे अतलस्पर्शः अहितजुषां दुर्जनानां दुरासदः अनभिभवनीयः पक्षे अहितजुषां रोगिणां दुरासदः अस्पर्शनीयः पद्मायाः लक्ष्म्याः पक्षे पद्मानाम् एकभूमिः अद्वितीय आश्रयः । तस्मात् महतां जनानां तापस्य दुःखस्य पक्षे उष्मणः शान्तये उपशमनाय कोऽपि जलाशयः असि इति मन्ये । शार्दूलविक्रीड़ितं वृत्तम् ॥६३॥

शङ्खेति । त्वं करे शङ्खचक्राभ्यां परिचिह्नितः, पादयोः ध्वजमुखादिना ध्वजवज्रादिना लाञ्छितः अलङ्कृतः, वनजया मालया वनपुष्पमालया शोभितश्च, अतः अखिलं समग्रं वैष्णवाङ्कं विष्णुचिह्नम् आश्रितः । तस्मात् त्वं विष्णुरसीति भावः ॥६४॥

सर्वेषामिति । त्वं सर्वेषां जनानां तापनाशाय दक्षिणः दक्षिण-

कथं न मयि दाक्षिण्यं कुर्यादाशंसनं मम ॥६५॥

त्वं दानवारिपरिसेवनजातकर्मा
नित्यादिकर्मसु तथा कृतदानधर्मा ।
लोकादिरक्षणविधौ कृतधर्मवर्मा
दानादिनाश्रितजने कृतदेवशर्मा ॥६६॥

उज्जृम्भते हि सरसां कमलोदयार्थं
भास्वान् दिवेति विदितं नृप ! लोकमध्ये ।
त्वं सर्वदा तु जगतां किल सर्वदाना-
दुज्जृम्भसे नरपते ! कमलोदयार्थम् ॥६७॥

दिग्वर्त्ती मलयाचलः, मयि कथं दाक्षिण्यम् औदार्यं न कुर्यात्
अपि तु कुर्यादेवेत्यर्थः । इति मम आशंसनम् आशेत्यर्थः ॥६५॥

त्वमिति । त्वं दानवानाम् अरिर्विष्णुः तस्य परिसेवनं सर्वथा
समाराधनमेव कर्म यस्य तथाभूतः विष्णुपासक इत्यर्थः नित्यादि-
कर्मसु यदकरणे प्रत्यवायः तन्नित्यं तत् आदि येषां तथोक्तेषु कर्मसु
आदिपदेन काम्यनैमित्तिकानां ग्रहणम् । कृतः दानधर्मः येन तथा-
भूतः, लोकादीनां रक्षणविधौ पालनव्यापारे कृतः धृत इत्यर्थः
अवलम्बित इति यावत् धर्मवर्त्म धर्ममार्गो येन तादृशः तथा आश्रित-
जने दानादिना कृतं देवानां शर्म सुखं येन तथाभूतः आश्रितव्यक्तिषु
दानेन देवास्तुष्यन्तीति भावः । वसन्ततिलकं वृत्तम् ॥६६॥

उज्जृम्भत इति । हे नृप ! भास्वान् सूर्यः लोकमध्ये जगति
दिवा दिवसे सरसां जलाशयानां कमलोदयार्थं पद्मविकासार्थम्
उज्जृम्भते हि उदेत्येव इति विदितं ज्ञातम् । हे नरपते ! त्वन्तु
जगतां भूतलवासिनां कमलोदयार्थं सम्पद्वृद्ध्यर्थं सर्वदानात् सर्वधन-
वितरणात् सर्वदा दिवसे रात्रौ चेत्यर्थः उज्जृम्भसे उदेषि । व्यति-
रेकालङ्कारः । वसन्ततिलकं वृत्तम् ॥६७॥

उदयेनैव सविता जगद्धर्मप्रवर्त्तकः ।
अर्द्धोदयेऽसि नृपते ! सर्वधर्मप्रवर्त्तकः ॥६८॥

शश्वत् स्तुतोऽसि मनसा परिशीलितोऽसि
ध्यानेन मुद्रितदृशा च विलोकितोऽसि ।
तस्मात्तु ते परिचयो मयि वर्त्ततेऽद्य
त्वय्येव मे परिचयाय ममैष यत्नः ॥६९॥

तव गुणनिकरान्तं नैव गन्तुं समर्था
वयमिति विरताः स्म श्रान्तियोगाच्च राजन् ! ।
कलयसि गुणलेशं दोषजालं जहासि
गुणिगणगुणलेशादाशुतोषो भवान् यत् ॥७०॥

उदयेनेति । हे नृपते ! सविता सूर्यः उदयेनैव सम्यगिति शेषः जगतां धर्मस्य कार्य्यस्य प्रवर्त्तकः निष्पादकः । त्वन्तु अर्द्धोदये किञ्चिन्मात्रोदये अल्पकालमात्रराजकार्य्यपरिदर्शनेऽपीति भावः सर्वेषां धर्मप्रवर्त्तकः । तव शासने सर्व एव स्वं स्वं धर्ममनुसृत्य चलन्तीति भावः । अनुष्टुब्वृत्तम् ॥६८॥

शश्वदिति । हे राजन् ! त्वं शश्वत् सततं स्तुतः असि तव नाम सर्वदैव स्तुतमिति भावः, मनसा परिशीलितः कीदृशोऽसौ नृप इति विचिन्तितः असि, ध्यानेन मुद्रितदृशा च निमीलितनयनेन च विलोकितः दृष्टः असि, तस्मात् ते तव परिचयः मयि वर्त्तते तिष्ठति, अद्य तु त्वयि मे मम परिचयाय मम एषः यत्नः प्रयासः अहं कीदृश इति ज्ञापनार्थं त्वामित्थं स्तौमीति भावः । वसन्ततिलकं वृत्तम् ॥६९॥

तवेति । हे राजन् ! वयं तव गुणनिकराणां गुणराशीनाम् अन्तं पारं गन्तुं नैव समर्थाः शक्ताः इति श्रान्तियोगात् परिश्रमाच्च हेतोः विरताः स्म निवर्त्तामहे तव गुणवर्णनादिति भावः । त्वं यत् यतः गुणिगणानां गुणलेशात् यत्किञ्चिद्गुणश्रवणात्;

गुणानामाधारे गुणिजनगुणग्राहकवरे
दयासारे पारे वचनमनुवर्णैकनिलये ।
ममैषा विज्ञप्तिर्नयनपदवीमेत्य सहसा
सदा सानन्दं तं विरचयतु नित्यं रमयतु ॥७१॥
प्रशस्तिपत्रिका यत्नात् श्रीताराानाथशर्म्मणा ।
द्विजेन रचिता तुष्ट्यै नृपस्यास्तु चिरं शिवम् ॥७२॥

इति श्रीताराानाथतर्कवाचस्पतिभट्टाचार्य्यविरचिता
राजप्रशस्तिः समाप्ता ।

श्वाशु शीघ्रं तुष्यतीति तथोक्तः अतः गुणलेशं कलयसि गृह्णासि दोषजालं दोषराशिञ्च त्यजसि गुणिगणानामुक्तेरिति शेषः । मालिनी-वृत्तम् ॥७०॥

गुणानामिति । गुणानाम् आधारे आश्रये गुणिजनानां गुणग्राहकवरे गुणग्राहकश्रेष्ठे दयासारे कृपानिधौ अपारे दुरव-गाहस्वभावे वचनान्येव मनुवर्णाः मन्त्रवर्णाः तेषाम् एकनिलये अद्वितीयावासे एषा मम विज्ञप्तिः स्तुतिरिति यावत् नयनपदवीं दृष्टिपथं तस्येति शेषः एत्य सहसा तं राजानमिति शेषः सदा सानन्दं विरचयतु करोतु नित्यं रमयतु प्रीणयतु च । शिखरिणी-वृत्तम् ।७१॥

प्रशस्तीति । श्रीताराानाथशर्म्मणा द्विजेन यत्नात् यस्य तुष्ट्यै इयं प्रशस्तिपत्रिका रचिता तस्य नृपस्य चिरं शिवं मङ्गलम् अस्तु भवतु ॥७२॥

इति श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण कृता
राजप्रशस्तिव्याख्या समाप्ता ।

समाप्तश्च ग्रन्थः ।

প্রকাশক—শ্রীজীবানন্দবিদ্যাসাগর বি, এ,
২নং রমানাথমজুমদারের ষ্ট্রীট
কলিকাতা।
প্রিণ্টর—শ্রীক্ষেত্রমোহন মুখোপাধ্যায়
৫৬ নং আমহার্ষ্ট ষ্ট্রীট
কলিকাতা।

कलिकाता संस्कृतविद्यामन्दिरे बि, ए, उपाधिधारिण: श्रीजीवानन्दविद्यासागर-भट्टाचार्यस्य सकाशात् लभ्यानि।